Reg. No. | | | | | | | | | |

# BSCSKL 281/FNDSKL 281/BHMSKL 281/BFTSKL 281/ BSASKL 281

**Choice Based Credit System IV Semester B.Sc./B.Sc. (FND)/**
**B.Sc. (A & VE)/B.Sc. (FT)/B.H.M. Degree Examination, September 2022**
**(2020-21 Batch Onwards)**
**SANSKRIT**
**Sanskrit Language**

Time : 3 Hours Max. Marks : 80

*सूचना : 1) **संस्कृत**भाषया, **कर्णाटक**भाषया, **आङ्ग्ल**भाषया वा उत्तराणि लिखत ।*
*2) यत्र **संस्कृतेन** लिखत इति सूचना वर्तते तत्र **संस्कृते**नैव उत्तरं लिखत ।*

1. अधोनिर्दिष्टेषु **द्वयम्** अनुवादं कृत्वा **कर्णाटक**भाषया **आङ्ग्ल**भाषया वा विवृणुत । **(2×5=10)**

1.1) वृक्षाणां परोपकारित्वात् ऊर्ध्वगतिमाप्नुवन्तीत्यस्मादपि हेतोस्त ऊर्ध्वस्रोतसः । पनसकूष्माण्डादिरूपं फलं वहन्तो द्रुमलतादयो न खलु स्वयं तत्फलं खादन्ति । परेषामुपकारायैव ते फलन्ति, पुष्प्यन्ति, श्वसन्ति, शुष्यन्ति च । ते श्वसन्त आम्लजनकं सृजन्ति । पुष्यन्तः प्रकृतिमलङ्कुर्वन्ति, सुगन्धयन्ति, द्विरेफादीन् पुष्णन्ति च । मृता अपि ते शुष्काः सन्तः इन्धनरूपेण पाकेषूपयुज्यन्ते । मरणानन्तरमपि उपकुर्वन्तीत्यहो वृक्षाणां जन्मसार्थक्यम् । इत एते वृक्षजीवाः परोपकारजात्पुण्यात् मरणानन्तरमूर्ध्वगतिमेवाप्नुवन्तीति ऊर्ध्वस्रोतसः ।

1.2) अस्मदीये अस्मिन् दाक्षिणात्ये जनपदे ताम्बूलं नाम मङ्गलवस्तु बहुषु सन्दर्भेषु उपयुज्यते । कन्निकाः सुवासिन्यश्च यदा आमन्त्रिताः ताभ्यः ताम्बूलं कुङ्कुमं च दत्वा पूजयेदिति शिष्टाचारः । विवाहपूर्वं वाग्भिश्च ये च वधूवरपक्षीयाः ताम्बूलविनिमयेन निश्चितः सम्बन्धः सत्यमस्तु इति प्रतिज्ञां कुर्वन्ति । देवपूजायां नैवेद्यसमर्पणानन्तरं ताम्बूलं अवश्यं प्रदातव्यम् । दानदक्षिणादिप्रदाने प्रथमं ताम्बूलं दद्यात् । शुभकार्येषु आमन्त्रणसमये ताम्बूलेन सह आह्वयन्ति । विशिष्टकार्यनियोजने तथा युद्धादिकालेऽपि ताम्बूलप्रदानमुक्तम् । देवकार्येषु पितृकार्येषु स्नेहसम्बन्धसंवर्धने च ताम्बूलं बहूपकारि ।

1.3) द्वौ वृषभौ । शकटपूर्णमन्नम् । शकटनियन्ता एक: मनुष्य: इति एतेषां आहाररूपेण प्रतिदिनं प्रेषणं एकचक्रनगररक्षकेण बकाख्यराक्षसेन सह तन्नगरवासिनां समय: ।

तच्च एकस्य ब्राह्मणपरिवारस्य दिनम् । श्रोत्रिय: ब्राह्मण:, सुशीला सहधर्मिणी, एका पुत्री, तदनुज: एक: बाल: इति चतुर्णां तत्परिवार: । बकसमीपम् एकस्य गमनम् अनिवार्यम् । कुटुम्बसदस्या: प्राप्तां समस्यामिमां एवं निर्वहन्ति ।

पत्नी – न सन्तापस्त्वया कार्य: प्राकृतेनैव कर्हिचित् ।

न हि सन्तापकालोऽयं वैद्यस्य तव विद्यते ।।

2. अधोनिर्दिष्टवाक्येषु **पञ्चानां** वाक्यविवरणं **कर्णाटक**भाषया, **आङ्ग्ल**भाषया, **संस्कृत**भाषया वा लिखत । **(5×3=15)**

2.1) चतुर्विधा भजन्ते माम् ।

2.2) चेतनधर्मा: सर्वेऽपि वृक्षेषु सन्ति ।

2.3) शरीरायासजनकं कर्म व्यायाम: ।

2.4) षड् जीवलोकस्य सुखानि राजन् ।

2.5) एकोऽसौ रसराज: शरीरम् अजरामरं कुरुते ।

2.6) एकाग्रचित्तं साधकानाम् ।

2.7) पर्णमूले भवेद् व्याधि: ।

2.8) धर्मप्रजासम्प्राप्ति: विवाहफलमिति श्रुतम् ।

3. **त्रीन्** प्रश्नान् **कर्णाटक**भाषया, **आङ्ग्ल**भाषया, **संस्कृत**भाषया वा उत्तरयत । **(3×8=24)**

3.1) भगवत: स्वरूपं ज्ञातुं के समर्था: तथा के असमर्था: इति निरूपयत ।

3.2) व्यायाम–उद्वर्तन–स्नानविधानं आयुर्वेदशास्त्ररीत्या विवृणुत ।

3.3) योगस्य अष्टौ अङ्गानि कानि ? तानि विवृणुत ।

3.4) ताम्बूलस्य गुणान् उपयोगांश्च वर्णयत ।

3.5) ब्राह्मणकुटुम्ब: समस्यानिर्वहणे कीदृशीं औचित्यप्रज्ञां दर्शयति ? विवृणुत ।

4. **द्वौ कर्णाटक**भाषया, **आङ्ग्ल**भाषया, **संस्कृत**भाषया वा टिप्पणीं रचयत । **(2×5=10)**

4.1) भागवते उक्त: वृक्षभेद: वृक्षधर्मश्च ।

4.2) रसशास्त्रस्य मूलं विकासश्च ।

4.3) अश्विनीमहिमा ।

4.4) मृगस्य मोचनाय काकेन कृत: उपाय: ।

5. **द्वौ संस्कृत**भाषया टिप्पणीं रचयत । **(2×5=10)**

5.1) भगवद्गीता ।

5.2) आयुर्वेदसुभाषितानि ।

5.3) हितोपदेश: ।

5.4) दु:खत्रयम् ।

6. अधोनिर्दिष्टवाक्येषु **षट्**वाक्यानि पाठ्याधारेण पूरयत । **(1×6=6)**

6.1) सर्वोपनिषदो ___________ ।

(मातर:, गाव:, ज्ञानम् )

6.2) अन्त:स्पर्शा: तमप्राया: ___________ ।

(प्राणिन: मनुष्या:, वृक्षा:)

6.3) शरीरमाद्यं खलु ___________ साधनम् ।

(कर्म, ज्ञान, धर्म)

6.4) निशायां क्षीरभोजनं आयुष: ___________ करोति ।

(क्षयं, वर्धनं, नाशं)

6.5) प्राप्तिस्थानानुसारं पारदस्य ___________ विधा: भवन्ति ।

(षट्, अष्ट, पञ्च)

6.6) पुरुषः पुष्करपत्रवत् __________ ।

(निर्गुणः सगुणः, निर्लेपः )

6.7) कष्टात् त्रायन्ते इति __________ अपेक्ष्यन्ते ।

(दाराः, धनानि, पुत्राः)

6.8) सुबुद्धिनामा __________ मृगस्य चिरमित्रम् ।

(पिकः, काकः, घूकः)

7. संयोजयत । **(5×1=5)**

| | |
|---|---|
| 7.1) प्रकृतिः | चित्राङ्गः |
| 7.2) रसशास्त्रम् | सगुणा |
| 7.3) मृगः | पारदप्रधानम् |
| 7.4) जम्बुकः | निर्गुणः |
| 7.5) घोषयात्रा | क्षुद्रबुद्धिः |
| | द्वैतवनम् |